संस्कृतवार्ताः

09/03/2025

सायम्  - 06:20

<u>मुख्यवार्ताः</u>

· भारत-न्यूजीलैंड-दलयोः मध्ये दुबई नगरे आईसीसी चैंपियंस ट्रॉफी इति क्रिकेट-स्पर्धामालिकायाः बहुप्रतीक्षित-निर्णायक-स्पर्धायां न्यूजीलैण्ड-दलेन द्विपंचाशदुत्तर द्विशत धावनाङ्कानां विजय-लक्ष्यं प्रदत्तम्।

· केन्द्रीयगृहसचिवः गोविन्दमोहनः अद्य जम्मूनगरे केन्द्र शासित प्रदेशे सुरक्षास्थितेः विषये उच्चस्तरीयसमीक्षासभायाः अध्यक्षतां कुर्वन् अस्ति।

· भारतेन कैलिफोर्नियायां हिन्दू-मन्दिरस्य क्षतेः निन्दा कृता, प्रकरणेस्मिन् संलग्नानां विरुद्धं दृढकार्याचरणाय निवेदिता।

· सीरियायां देशस्य सुरक्षाबलानां अपदस्थ-राष्ट्रपतेः बशर-अल-असद इत्यस्य समर्थकानां च मध्ये दिन-द्वयं यावत् प्रवृत्तासु हिंस्र-घटनासु मृतकानां सङ्ख्या एक-सहस्राधिका सञ्जाता।

· जम्मू-कश्मीरराज्ये गुलमर्गस्य स्की-रिसोर्ट् इति अद्यारभ्य पञ्चविंशत्यधिक द्विसहस्रतम वर्षीयाया: खेलो इण्डिया-शीतकालिक क्रीडायाः पञ्चमसंस्करणस्य द्वितीयचरणस्य आयोजनं कर्तुं सज्जः अस्ति।

<u>क्रिकेट्</u>

भारत-न्यूजीलैंड-दलयोः मध्ये दुबई नगरे आईसीसी चैंपियंस ट्रॉफी इति क्रिकेट-स्पर्धामालिकायाः बहुप्रतीक्षित-निर्णायक-स्पर्धायां जनेषु प्रबलोत्साहः दृश्यते। न्यूजीलैंड-दलेन पणकं विजित्य प्रथम क्रीडनं स्वीकृतम्। अन्तिम-वार्ताः लेखन-समयं यावत् न्यूजीलैंड-दलेन पंचाशत् क्षेपचक्रेषु सप्त क्रीडकाणां हानौ पुरस्सरं द्विपंचाशदुत्तर द्विशत धावनाङ्कानां विजय-लक्ष्यं प्रदत्तम्।

अवधेयं वर्त्तते यत् सम्पूर्ण- स्पर्धायां भारतम् अपराजितं वर्तते। भारतीय दलं बाङ्ग्लादेश-पाकिस्तान- न्यूजीलैण्ड-दलानां उपरि प्रभावपूर्णं विजयं प्राप्नोत्, तदनन्तरं आस्ट्रेलिया-देशस्य उपरि रोमाञ्चकरे उपान्त्य-चक्रे विजयं प्राप्नोत्।

केन्द्रीयगृहसचिवः

केन्द्रीयगृहसचिवः गोविन्दमोहनः अद्य जम्मूनगरे केन्द्र शासित प्रदेशे सुरक्षास्थितेः विषये उच्चस्तरीयसमीक्षासभायाः अध्यक्षतां कुर्वन् अस्ति। सत्रद्वये प्रचल्यमाणायां सभायां जम्मू-कश्मीर राज्यस्य वरिष्ठारक्षी-सुरक्षाधिकारिणः एकत्र समागताः यत्र सुरक्षा-परिदृश्यस्य आकलनं भवति, क्षेत्रे आतङ्कवादस्य उन्मूलनार्थं रणनीतयः च निर्मिताः भविष्यन्ति। अर्धसैनिकबलानाम्, गुप्तचर-विभागानां च शीर्षाधिकारिणः अपि अस्मिन् सत्रे भागं गृह्णन्ति। जम्मूक्षेत्रे केन्द्रीयगृहसचिवेन कार्यभारग्रहणानन्तरं प्रथमा सुरक्षासमीक्षा अस्ति। असौ इत: पूर्वं कश्मीरक्षेत्रं गत्वा परिदृश्यस्य मूल्याङ्कनं कृतवान् ।

विदेशमंत्रालय:-कैलिफोर्निया

भारतेन कैलिफोर्नियायाः चिनो-हिल्स इत्यत्र हिन्दू-मन्दिरस्य क्षतेः निन्दा कृता। वार्ताहरानां प्रश्नस्य उत्तरं ददता विदेशमन्त्रालयस्य प्रवक्त्रा रणधीरजयसवालेन उक्तं यत्, मन्त्रालयेन स्थानीयविधिप्रवर्तनाधिकारिण: निवेदिता: यत् ते मन्दिरक्षतिप्रकरणे संलग्नानां विरुद्धं दृढकार्याचरणम् आचरन्तु इति। पूजास्थलानां पर्याप्तसुरक्षां सुनिश्चेतुम् अपि मन्त्रालयेन आग्रहः कृतः।

सीरियायां - राष्ट्रपतेः

सीरियायां देशस्य सुरक्षाबलानां अपदस्थ-राष्ट्रपतेः बशर-अल-असद इत्यस्य समर्थकानां च मध्ये दिन-द्वयं यावत् प्रवृत्तासु हिंस्र-घटनासु मृतकानां सङ्ख्या एक-सहस्राधिका सञ्जाता। गुरुवासरे लताकिया-प्रान्ते आरब्धाः हिंस्र-घटनाः सम्प्रति भूमध्यसागर-तटं यावत् प्रसृता। ब्रिटेन-स्थिते युद्ध-निरीक्षण-समूहेन सीरियन ऑब्जर्वेटरी फॉर ह्यूमन राइट्स इत्यनेन उक्तं यत् पञ्च-चत्वारिंशदुत्तर-सप्तशतं नागरिकान् अतिरिच्य प्रशासनिक-सुरक्षा-बलानां सपादैक-शतं सदस्याः अथ अपदस्थ-राष्ट्रपतेः बशर असद-इत्यमुना सम्बद्ध-सशस्त्र-समूहानाम् अष्ट-चत्वारिंशदुत्तरैकशतं जना: मृताः। समूहेन इदमपि उक्तं यत् लताकिया इत्यस्य नैकेषु क्षेत्रेषु जलविद्युदयोः आपूर्तिः बाधितास्ति। सीरियायाम् अपदस्थस्य राष्ट्रपतेः असद इत्यस्य अल्पसंख्यक अलावीते समुदायं विरुध्य प्रशासन-समर्थित-भुशुण्डी-धारिभिः आक्रमणानि विधीयन्ते।

## प्रधानमन्त्री मॉरिशस

प्रधानमन्त्री नरेन्द्रमोदी मंगलवासरे मॉरिशस-देशस्य द्विदिवसीय-यात्रायां यास्यति। गतसायं राजधान्यां नवदिल्ल्यां वार्ताहरैः सह संवादे विदेश-सचिवेन विक्रम-मिसरी इत्यनेन इदं विवरणम् उपस्थापितम्। तेनोक्तं यत् प्रधानमन्त्री मॉरिशस-देशस्य राष्ट्रिय-दिवस-समारोहे मुख्यातिथि-रूपेण सम्मिलितो भविष्यति। श्रीमोदी मॉरिशस-देशस्य राष्ट्रपतिना धर्मवीर-गोखुल-वर्येण सह मेलिष्यति। श्रीमोदी तत्रत्येन संक्षेप नवीन-चन्द्र-राम-गुसाम इत्यनेन अथ च मॉरिशस-देशस्य वरिष्ठ-नेतृभिः सह अपि मेलिष्यति।

तत्र भारतीय-नौसैन्य-पोतेन समं रक्षा-बलानाम् एकं दलमपि समारोहे प्रतिभागं करिष्यति। प्रधानमन्त्री मोदी मॉरिशस-देशे भारतवंशिभिः साकं मेलिष्यति सममेव सिविल सर्विस कॉलेज इत्यस्य क्षेत्रीय-स्वास्थ्य-केन्द्रस्य च उद्घाटनं करिष्यति। अनयोः द्वयोः प्रतिष्ठानयोः निर्माणं भारतस्य अनुदान-साहाय्येन सञ्जातम्। प्रधानमन्त्रिणः यात्रावधौ अनेकेषु सन्धिज्ञापन-पत्रेषु हस्ताक्षराणि अपि भविष्यन्ति।

## वित्तसङ्कल्पपत्रम्

संसदः आयव्ययपत्रक-सत्रस्य द्वितीयं सत्रं श्वः आरपस्यते। इदं सत्रम् अप्रैल-मासस्य चतुर्थ-दिनं यावत् प्रचलिष्यति। अत्रावधौ सदनस्य विंशतिः उपवेशनानि भविष्यन्ति। चतुरिविंशत्युत्तर-द्विसहस्रं पञ्चविंशत्युत्तर-द्विसहस्र-वर्षाय अनुदान अध्यर्थनासु विनियोग-विधेयकेषु चर्चा मतदानं च भविष्यतः। एतदतिरिच्य बैंकिंग विधि-विधेयकं चुर्विंशत्युत्तर-द्वि-सहस्रतमादं तटीयनौवहन-विधेयकं त्रिभुवन सहकारी विश्वविद्यालय-विधयेकम् ऐषमः आव्रजनविदेशी विधेयकम् अथ च रेलवे (संशोधन) विधेयकं समेत्य नैकेषु विधायि-कार्येषु चर्चा भविष्यति। एतानि विधेयकानि पारयिष्यन्ते। अवधेयं वर्तते यत् वित्त-सङ्कल्प-पत्र-सत्रस्य प्रथम-चरणम् जनवरी मासस्य अन्तिमदिनात् फरवरी मासस्य त्रयोदश-दिनाङ्कं यावत् प्रवर्तितम्।

## उपराष्ट्रपतेः

उपराष्ट्रति: जगदीपधनखड़वर्य: अस्वस्थतायाः अनन्तरं नवदिल्ल्याः एम्स इत्यत्र प्रवेशितः। उपराष्ट्रपतिः गतरात्रौ चिकित्सालये नीतः आसीत्। सूत्रानुसारी सम्प्रति श्रीधनखड़स्य स्थितिः स्थिरः अस्ति।प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्याः एम्स चिकित्सालयस्य भ्रमणं कृत्वा उपराष्ट्रपतिजगदीपधनखड़स्य स्वास्थ्यविषये पृष्टवान्। प्रधानमन्त्रिणा तस्य सुस्वास्थ्याय शीघ्रं स्वस्थतायै च प्रार्थना अपि कृता ।

जम्मू-कश्मीरे

जम्मू-कश्मीरराज्ये गुलमर्गस्य स्की-रिसोर्ट् इति अद्यारभ्य पञ्चविंशत्यधिक द्विसहस्रतम वर्षीयाया: खेलो इण्डिया-शीतकालिक क्रीडायाः पञ्चमसंस्करणस्य द्वितीयचरणस्य आयोजनं कर्तुं सज्जः अस्ति, यत्र हिमपातः बहुप्रतीक्षितस्य आयोजनस्य सुरम्यपृष्ठभूमिं ददाति। लद्दाखराज्ये प्रथमचरणस्य विजेतारः, स्वस्य स्थानं संरक्षयितुं प्रयतन्ते। अद्य सायंकाले सार्धषड्वादने औपचारिकं उद्घाटनसत्रं आरभते। त्रिदिवसीयेऽस्मिन् कार्यक्रमे अष्टशतं यावत् क्रीडकानां सहभागिता भविष्यति, ये चतुर्षु प्रमुखविषयेषु प्रतिस्पर्धां करिष्यन्ति, जम्मू-कश्मीरस्य उपराज्यपालः मनोजसिन्हा: उद्घाटन सत्रे भागं भजिष्यति।

।। इति वार्ता:।।